# ArSheyopaniShat

# આર્ષેયોપનિષત્

## Document Information

Text title : ArSheyopaniShat

File name : ArSheyopaniShat.itx

Category : upanishhat, vedanta

Location : doc_upanishhat

Proofread by : Sunder Hattangadi Radim Navyan radimnavyan at gmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : October 20, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# આર્ષેયોપનિષત્

ૐ ઋષયો વૈ બ્રહ્મોદ્યમાહ્વયિતવા ઊચુઃ પરસ્પરમિવાનુબ્રુવાણાઃ ।
તેષાં વિશ્વામિત્રો વિજિતીયમિવ મન્યમાન ઉવાચ । યદેતદન્તરે
દ્યાવાપૃથિવી અનશ્નુવદિવ સર્વમશ્નવદ્યદિદમાકાશમિવેતશ્ચેતશ્ચ
સ્તનયન્તિ વિદ્યોતમાના ઇવાવસ્ફૂર્જયમાના ઇવ તદ્બ્રહ્મેતિ ।
તસ્યોપવ્યાખ્યાનમ્ । યદિદમગ્નિભિર્જ્વલયન્તિ
પોપ્લૂયયન્ત્યદ્ભિરભિષીવયન્તિ વદ્ધ્રીભિરભિગ્રથ્નન્તિ
વરત્રાભિરભિઘ્નન્ત્યયોઘનૈર્વિધ્યન્તિ સૂચીભિઃ નિખાનયન્તિ
શઙ્કુભિરભિતૃન્દન્તિ પટ્ટીશિકાભિરભિલિમ્પન્તિ મૃત્સ્નયા
તક્ષ્ણુવન્તિ વાસીભિઃ કૃષ્ણન્તિ ફલિભિર્નહૈવ શક્નુવત ઇતિ
નાસ્યેશીમહિ નૈનમતીયીમહિ ॥
તદુ હ જમદગ્નિર્નાનુમેને આર્તમિવ વા એષ તન્મેને
યદિદમન્તરેણૈનદુપયન્તિ પર્યાસ ઇવૈષ દિવસ્પૃથિવ્યોરિતિ ।
સ હોવાચ અન્તરિક્ષં વા એતદ્યદિદમિત્થેત્થોપવ્યાખ્યે ઇતિ ।
મહિમાનં ત્વમુષ્યેહ પશ્યામીતિ યદિદમસ્મિન્નન્વાયત્તમિતિ । સ
યદિદમેતસ્મિન્નન્વાયત્તં વેદાથ તથોપાસ્તેઽન્વાયત્તો હૈવાસ્મિન્ ભવતિ ।
તદેતદવિદ્વાનેવાસ્મિન્નન્વાયત્તમુપાસ્તે વીવપદ્યત્ આર્તિમૃચ્છેત્ ।
તસ્માદેવમેવોપાસીત ॥
તમિતરઃ પપ્રચ્છ । કતમત્ ત્વમનાર્તં મન્યસ ઇતિ । તં હોવાચ ।
યદિદમિતિ દ્યાવાપૃથિવ્યોરનારમ્ભમિવ નોપયન્તિ નાભિચક્ષતે
નાશ્નુવન્તિ । તસ્યોપવ્યાખ્યાનમ્ । યદિદમિતશ્ચેતશ્ચાણ્ડકોશા ઉદયન્તિ
નાપદ્યન્ત ઇવ ન વિસ્રંસન્ત ઇવ ન સ્ખલન્તીવ ન પર્યાવર્તન્ત ઇવ ।
ન હ વા એનત્કેચિદુપધાવન્તો વિન્દન્તિ નાભિપશ્યન્તિ । યદિદમેક ઇદપ (?)
એવાહુસ્તમ એકે જ્યોતિરેકેઽવકાશમેકે પરમં વ્યોમૈક આત્માનમેક ઇતિ ॥
તદુ હ ભરદ્વાજો નાનુમેને । યદિહ સર્વે વેત્થેત્થેતિ દ્યૂદિરે
નાસ્ય તદ્રૂપં પર્યાપ્તમિતિ । સ હોવાચ । આર્તમિવેદં તે વિજ્ઞાનમપિ

સ્વિદેનદ્રોદસ્યોરેવ પર્યાયેણોપવન્વીમહિ યદિદમિત્થેત્થોપવ્યાખ્યાસ્યામ
ઇતિ । મહિમાનં ત્વેવાસ્યોપાસે । યદિદમત્રાન્વાયત્તમિતિ । સ
યદિદમત્રાન્વાયત્તં વેદાથ તથૈવોપાસ્તેઽત્રૈવાન્વાયત્તો
ભવતિ । સ ય ઇહાન્વાયત્તમિદમવિદ્વાનેવૈતદુપાસ્તે પાપીયાન્
ભવત્યાર્તિમાર્ચ્છત્યવમ્રિયતે યદેવમેતદન્વાયત્તમુપાસ્તે સર્વમાયુરેતિ
વસીયાન્ ભવતિ । સ ય એતદેનમુપાસ્તે ॥
તમિતરઃ પપ્રચ્છ । કતમત્ ત્વમનાર્તં મન્યસ ઇતિ । સ હોવાચ ।
યદેતસ્મિન્ મણ્ડલેઽર્ચિર્દીપ્યતે બમ્ભ્રમ્યમાણમિવ ચાકશ્યમાનમિવ
જાજ્વલ્યમાનમિવ દેદીપ્યમાનમિવ લેલિહાનં તદેવ મે બ્રહ્મ ।
તસ્યોપવ્યાખ્યાનં યદિદમદ્ધૈવ પરાઃ પરાવતોઽભિપદ્યન્તે
સમ્પન્નમેવૈતત્ સમ્મિતમેવ યથોપયાતમાત્મૈવાભિચક્ષત
ઇતિ । ય એતદભિપદ્યેવ ગુહ્ણીયાદથો વિસ્ફુરન્તીવ
ધાવન્તીવોત્પ્લવન્તીવોપશ્ચિપ્યન્તીવ ન હૈવાભિપદ્યન્તે । તદિદમન્તિકે
દવીયો નેદીય ઇવ દૂરતો ન વા અસ્ય મહિમાનં કશ્ચિદેતીતિ ॥
તદુ હ ન મેને ગૌતમો યદિદમાર્તમિવ સ્તિમિતમિવ પર્યાયેણ
પશ્યન્તીવેમં મોઘં સંવિદાના ઇતિ ।
ય ઇમે પુણ્ડ્રાઃ સુહ્માઃ કુલુમ્ભા દરદા બર્બરા ઇતિ ।
ન હ વા અસંવિદાના એવ દ્રાગિવાભિ તત્પદ્યન્ત ઇતિ ।
મહિમાનં ત્વેવાસ્યોપાસે । ય એતદસ્મિન્નન્તરે હિરણ્મયઃ પુરુષો
હિરણ્યવર્ણો હિરણ્યશ્મશ્રુરાનખાગ્રેભ્યો દીપ્યમાન ઇવ । સ ય
એવમેનમુપાસ્તેઽતીવ સર્વભૂતાનિ તિષ્ઠન્તિ સર્વમાયુરેતિ વસીયાન્
ભવતિ । ન હ વા એષ પરમતીવોદેતિ । યસ્ત્વેનં પરમતીવોદ્યન્તં
પશ્યન્નુપાસ્તે પાપીયાન્ ભવતિ વીવપદ્યત આર્તિમૃચ્છતિ । યસ્ત્વેનં
પરમનૂદ્યન્તં વેદાથ તથોપાસ્તે પરં જ્યોતિરુપસમ્પદ્યતે સર્વમાયુરેતિ
વસીયાન્ ભવતિ । સ ય એવમેનમુપાસ્તે ॥
તમિતરઃ પપ્રચ્છ । કતમત્ ત્વમનાર્તં મન્યસ ઇતિ । તં હોવાચ ।
વિસ્ફુરન્તીરેવેમા લેલાયન્તીરિવ સઞ્જિહાના ઇવ નેદીયસિતમા ઇવ
દવીયસિતમા એવ દવીયસિતમા ઇવ નેદીયસિતમા એવેતિ । યદપિ
બહુધાચક્ષીરન્ન કિઞ્ચ પ્રતિપદ્યત ઇતિ તન્મે બ્રહ્મેતિ ॥
તદુ હ વસિષ્ઠો નાનુમેને । યદિમા વિસ્ફૂર્જયત એવાભિપદ્યન્તે
વીવયન્તિ મિથુ ચેતિ વિચક્ષતેઽકાણ્ડ ઇવેમા ન હ વૈ
પરમિત્થા કશ્ચનાશ્નોત્યસંવિદાન ઇવ । અપ યે સંવિદ્રતે

તદેતદન્તર્વિચક્ષત ઇતિ । મહિમ્નઃ પશ્યેમા વિજાન ઇતિ । સ ય એવમિમા
મહિમ્ન એવાસ્ય પશ્યન્નુપાસ્તે મહિમ્ન એવાશ્નોતિ સર્વમાયુરેતિ વસીયાન્
ભવતિ । યસ્ત્વિમા અવયતીરેવોપાસ્તે ન પરા સમ્પદ્યમાના નો એવ પરેતિ
પાપીયાન્ ભવતિ વીવપદ્યતે પ્રમીયતે । અથ ય ઇમાઃ પરા સમ્પદ્યમાના
એવોપાસ્તે પરૈવ સમ્પદ્યતે સર્વમાયુરેતિ વસીયાન્ ભવતિ ॥
તમિતરઃ પપ્રચ્છ । કતમત્ ત્વમનાર્તં મન્યસ ઇતિ । મહાવિજ્ઞાનમિવ
પ્રતિપદેનાધ્યવસાયમિવ યત્રૈતદિત્થેત્થેત્યભિપશ્યતિ । અથ નેતિ
નેત્યેતદિત્થેત્થેતિ । સ વા અયમાત્મા અનન્તોઽજરોઽપારો ન વા અરે
બાહ્યો નાન્તરઃ સર્વવિદ્ભારૂપો વિધસઃ પ્રસરણોઽન્તર્જ્યોતિર્વિશ્વભુક્
સર્વસ્ય વશી સર્વસ્યેશાનઃ સર્વમભિક્ષિપન્ન તમશ્નોતિ કશ્ચન ॥
પરોવરીયાંસમભિપ્રણુત્યમન્તર્જુષાણં ભુવનાનિ વિશ્વા ।
યમશ્નવન્ન કુશિકાસો અગ્નિં વૈશ્વાનરમૃતજાતં ગમધ્યયી ॥ ૧॥
ભરેભરેષુ તમુપહ્વયામ પ્રસાસહિં યુધ્યમિન્દ્રં વરેણ્યમ્ ।
સત્રાસા [હ] મવસે જનાનાં પુરુહૂતમૃગ્મિણં વિશ્વવેદસમ્ ॥ ૨॥
અહિઘ્નં તમર્ણવે શયાનં વાવૃહાણં તવસા પરેણ ॥ ૩॥
તદ્ુ હ પ્રતિપેદિરે । તે વાભિવાદ્યૈવોપસમીયુઃ । નમોઽગ્નયે । નમ
ઇન્દ્રાય । નમઃ પ્રજાપતયે । નમો બ્રહ્મણે । નમો બ્રહ્મણે ॥
ઇત્યાર્ષેયોપનિષત્ સમાપ્તા ।

Proofread by Sunder Hattangadi,
Radim Navyan radimnavyan at gmail.com

*ArSheyopaniShat*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*